**4Z4TS51**

# सङ्कलनात्मकं मूल्याङ्कनम् - I (2015-16)

## संस्कृतम् - सम्प्रेषणात्मकम्

## कक्षा - दशमी

**समय : होरात्रयम्** **पूर्णाङ्काः 90**

**निर्देशाः**

(i) प्रश्नपत्रे **चत्वारः खण्डाः** सन्ति।

खण्डः (क) अपठित-अवबोधनम् - 10 अङ्काः

खण्डः (ख) रचनात्मक-कार्यम् - 15 अङ्काः

खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - 30 अङ्काः

खण्डः (घ) पठित-अवबोधनम् - 35 अङ्काः

(ii) सर्वे प्रश्नाः **अनिवार्याः।**

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्नसंज्ञ्या अवश्यमेव लेखनीया।

(v) उत्तराणि संस्कृतेनैव लेखनीयानि।

## खण्ड : 'क'

## अपठित-अवबोधनम् - ( 10 अङ्काः )

1 **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**(2 + 2 + 4 + 2) 10

स्वतन्त्रभारतस्य सञ्पूर्णं दायित्वम् अद्य छात्राणामुपरि अस्ति यतः अद्य ये विद्यार्थिनः सन्ति ते एव श्वः स्वतन्त्रभारतस्य नागरिकाः भविष्यन्ति। भारतस्य उन्नतिः पतनञ्च तेषामेव उन्नति-पतनयोः निर्भरे स्तः। अतः छात्राः स्वभाविजीवनस्य निर्माणम् अतीव सतर्कतया सावधानतया च कुर्युः, इदमेव तेज्यः अपेक्षते। ते प्रत्येकं क्षणं स्वराष्ट्रं, स्वसमाजं, स्वधर्मं, स्वसंस्कृतिञ्च स्वनेत्रयोः पुरतः निक्षिपेयुः यतः तेषां जीवनेन राष्ट्रं किञ्चिद् बलं प्राप्तुं शक्नुयात्। ये छात्राः राष्ट्रिय-दृष्टिकोणात् स्वजीवनस्य निर्माणं न कुर्वन्ति, ते राष्ट्राय, समाजाय वा भारभूताः एव भवन्ति। विद्यार्थिनां लक्ष्यं विद्योपार्जनमेवास्ति। विद्योपार्जनम् कृत्वा एव ते राष्ट्रं प्रति स्वकर्तव्यस्य निर्वाहं कर्तुं शक्नुवन्ति।

**(I) एकपदेन उत्तरत।**

(i) छात्राणामुपरि कस्य दायित्वम् अस्ति?

(ii) विद्यार्थिनां लक्ष्यं किम्?

**(II) पूर्णवाक्येन उत्तरत।**

(i) छात्रेज्यः किम् अपेक्षते?

(ii) कीदृशाः छात्राः राष्ट्राय समाजाय वा भारभूताः एव भवन्ति।

**(III) निर्देशानुसारं शुद्धम् उत्तरं विकल्पेज्यः चित्वा लिखत।**

(i) अनुच्छेदे 'छात्राणाम्' इत्यस्य कः पर्यायः आगतः?

| | | | |
|---|---|---|---|
| | | (अ) तेषाम् (ब) भारतस्य<br>(स) विद्यार्थिनः (द) विद्यार्थिनाम्<br>(ii) 'शक्नुयात्' क्रियापदस्य कर्तृपदं किम्?<br>(अ) तेषाम् (ब) राष्ट्रम्<br>(स) बलं (द) जीवनेन<br>(iii) 'पृष्ठतः' इत्यस्य पदस्य कः विपर्ययः अनुच्छेदे आगतः?<br>(अ) पुरतः (ब) ते<br>(स) ये (द) तेभ्यः<br>(iv) 'तेषामेव' उन्नति-पतनयोः अत्र 'तेषाम्' पदं कस्मै प्रयुक्तम्?<br>(अ) नागरिकेभ्यः (ब) शिक्षकेभ्यः<br>(स) छात्रेभ्यः/विद्यार्थिभ्यः (द) राष्ट्राय<br>**(IV) उपरिलिखितस्य अनुच्छेदस्य उचितं शीर्षकं लिखत।** | |
| | | **खण्डः 'ख'**<br>**रचनात्मक-कार्यम् - ( 15 अङ्काः )** | |
| 2 | | **भवान् विपुलः। अमेरिकादेशस्य यात्रायाः वर्णनं कुर्वता स्वमित्रं शशाङ्कम् प्रति लिखितम् पत्रम् मञ्जूषायां दत्तैः उचितपदैः पूरयतु। ( ½ x 10)**<br><br>कोलकातातः<br>तिथिः ............<br>प्रिय __(i)__ शशाङ्क !<br>सस्नेहं __(ii)__ ।<br>वयम् अत्र कुशलिनः। तत्रापि कुशलं कामये। अप्रैल मासस्य __(iii)__ तिथौ अहं __(iv)__ सह विमानेन अमेरिका देशम् __(v)__ । आवाम् अधुना 'शिकागो' नाम्नि नगरे स्वः। __(vi)__ अत्र रेलयानेन बसयानेन च यात्राम् कुर्वः। जनाः अत्र स्वकर्तव्यं, __(vii)__ च प्रति अतीव जागरूकाः सन्ति। अमेरिका तु अतीव __(viii)__ देशः अस्ति। जनाः अवकरम् अवकरपात्रे एव क्षिपन्ति। जूनमासस्य सप्तम्यां तिथौ अहं स्वदेशम् आगमिष्यामि। आगत्य विस्तरेण वदिष्यामि। गृहे __(ix)__ मम नमस्काराः।<br><br>भवतः प्रियं मित्रम्<br>__(x)__ ।<br>**मञ्जूषा**<br>विपुलः, सर्वेभ्यः, अगच्छम्, आवाम्, स्वच्छः, मित्र, स्वच्छताम्, एकादश्याम्, नमस्ते, जनकेन | 5 |
| 3 | | **मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।** | 10 |




**मञ्जूषा**

ग्रामीणजनाः, कष्टेन, गावः, स्वच्छं, नयति, जीवन्ति, वातावरणं, परिश्रमेण, पादाज़्यां, शकटम्, चलन्ति, उटजाः, सन्ति, घटं, शिरसि

**अथवा**

**'ग्रामीणजीवनम्' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत।** 10

**मञ्जूषा**

ग्रामीणजीवनम्, सरलम्, कृषकाः, भवति, परिश्रमेण, क्षेत्राणि, गाम्, भवति, सिञ्चन्ति, पालयन्ति, वातावरणम्, शुद्धम्

## खण्डः 'ग'

## अनुप्रयुक्त व्याकरणम् - ( 30 अङ्काः )

4 **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कृत्वा लिखत।** 5

(i) प्रातःकाले भानूदयं दृष्ट्वा मनः प्रसीदति।

(ii) शारद+अम्भोजवदना सरस्वती प्रसीदतु।

(iii) रविः+अवदत् - अहं सदा सत्यं वदामि।

(iv) एकम् अनुच्छेदं लिखतु।

(v) दानेन पाणिः शोभते न तु कं+कणेन।

5 **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** 6

(i) कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगम् इति चतुर्णां युगानां समाहारः।

(अ) चत्वारयुगः (ब) चत्वारियुगः

(स) चतुर्युगानाम् (द) चतुर्युगम्

(ii) नास्ति रागसमं दुःखम्।

| | | |
|---|---|---|
| | (अ) रागं समम् (ब) रागेण समम्<br>(स) रागात् समम् (द) रागः इव समम्<br>(iii) राज्ञः वचनं श्रुत्वा सकलब्रह्माण्डं व्याकुलं जातम्।<br>(अ) सकलब्रह्म अण्डम् (ब) सकलानां ब्रह्माण्डानां समाहारः<br>(स) सकलं ब्रह्माण्डम् (द) सकलस्य बह्माण्डम्<br>(iv) वानराः राज्ञः आदेशं श्रुत्वा भयत्रस्ताः अभवन्।<br>(अ) राज्ञादेशम् (ब) राज्ञोऽदेशम्<br>(स) राजदेशम् (द) राजादेशम्<br>(v) श्रीरामः 'पञ्चानां वटानां समाहारः इति स्थाने न्यवसत्।<br>(अ) पञ्चवटी (ब) पञ्चवटम्<br>(स) पञ्चवटाः (द) पञ्चवटः<br>(vi) अस्यां नद्यां शीतलसलिलम् अस्ति।<br>(अ) शीतलः सलिलः (ब) शीतलं सलिलम्<br>(स) शीतलाय सलिलम् (द) शीतलं सलिलः | |
| 6 | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययौ संयोज्य विभज्य वा चित्वा लिखत।**<br>(i) समाचारपत्रं पत्रमञ्चके पठनीयम्।<br>(ii) अस्माभिः सदैव समाजसेवा ______ (कृ + तव्यत्)।<br>(iii) श्रद्धावन्तः जनाः ज्ञानं लभन्ते।<br>(iv) अद्य मम वार्षिकी परीक्षा अस्ति।<br>(v) लोभ + इन् शान्तिम् न प्राप्नोति। | 5 |
| 7 | **प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत।**<br>(i) शुश्रूषा श्रवणं च ______धीगुणाः सन्ति।<br>(ii) एषः कलहः______भवतां विनाशकारणं भविष्यति।<br>(iii) हेयम् ______ च किम् भवति?<br>(iv) यथा सेवा ______ फलम्।<br>(v) ज्वालमालाकुलाः अश्वाः प्राणत्राणाय____ अधावन्।<br>**मञ्जूषा**<br>नूनम्, एव, अपि, इतस्ततः, तथा | 5 |
| 8 | **अधोलिखिते संवादे रिक्तस्थानानि वाच्यानुसारं पूरयत।**<br>(i) प्रतीक्षा-समीक्षे! त्वया कुतः______? (आ + गम्)<br>(ii) समीक्षा-प्रतीक्षे! अधुना अहं विद्यालयात् ______। (आ + गम्)<br>(iii) प्रतीक्षा - त्वं गृहं गत्वा किं करोषि? | 5 |

| | | | |
|---|---|---|---|
| | | समीक्षा ! गृहं गत्वा ______ गृहकार्यं क्रियते। (अस्मद्)<br>(iv) कोयलः – त्वम् किम् पिबसि ?<br>सोनलः – मया आम्ररसः ____। (पा)<br>(v) कोयलः – ततः किं त्वं कथां शृणोषि ?<br>सोनल – आम् ! ततः मया ______ श्रूयते। | |
| | 9 | **अधः रेलयानानां प्रस्थानसमयः अङ्केषु लिखितः। अङ्कानां स्थाने संस्कृतसंज्याशब्दान् लिखत।**<br>(i) 7:45 वादने शताब्दीरेलयानम्<br>(ii) 9 : 15 वादने वैशालीरेलयानम्<br>(iii) 5 : 00 वादनेखनऊमेलयानम्<br>(iv) 11 : 30 वादने गोमतीरेलयानम् | 4 |
| | | **खण्ड : 'घ'**<br>**पठित-अवबोधनम् - 35 अङ्काः** | |
| | 10 | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।(2+1+2)**<br>मेषस्य सूपकाराणां च कलहम् अवेक्ष्य नीतिविदाम् अग्रणीः वानरयूथपतिः अचिन्तयत् – 'एतेषां कलहो न वानराणां हिताय।' एवं विचार्य स यूथपः सर्वान् कपीन् आहूय रहसि अवदत् – सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति। उक्तं हि –<br>''तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।<br>तद्गृहं जीवितं वाञ्छन् दूरतःपरिवर्जयेत्।।''<br><br>**I. एकपदेन उत्तरत।**<br>(i) मेषस्य सूपकाराणां च कलहः केषां हिताय न आसीत् ?<br>(ii) यूथपतिः कान् आहूय उपदेशम् अयच्छत् ?<br>**II. पूर्णवाक्येन उत्तरत।**<br>कीदृशं गृहं दूरतः एव त्यक्तव्यम् ?<br>**III. निर्देशानुसारम् उचितम् उत्तरं विकल्पेज्यः चित्वा लिखत –**<br>(i) 'भवताम्' इति सर्वनामपदं केज्यः प्रयुक्तम् ?<br>(अ) मेषेज्यः (ब) अश्वेज्यः<br>(स) कपिज्यः (द) वैद्येज्यः<br>(ii) 'अवदत्' इति क्रियापदस्य कर्तृपदम् किम् ?<br>(अ) यूथपः (ब) कपिः<br>(स) वानरः (द) मेषः | 5 |

| | | |
|---|---|---|
| 11 | **अधोलिखितं श्लोकं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत।(2+1+2)**<br>शारदा शारदाम्भोजवदना वदनाम्बुजे।<br>सर्वदा सर्वदऽस्माकं सन्निधिं सन्निधिं क्रियात्।।<br>**I. एकपदेन उत्तरत।**<br>(i) का सर्वदा अस्ति?<br>(ii) सत् निधिं कुत्र सन्निधिं क्रियात्?<br>**II. पूर्णवाक्येन उत्तरत।**<br>सरस्वत्या: वदनं कथम् अस्ति?<br>**III. अधोलिखितप्रश्नयो: समुचितम् उत्तरं विकल्पेज्य: चित्वा लिखत –**<br>(i) 'क्रियात्' इति क्रियापदस्य कर्तृपदं किम्?<br>(अ) सन्निधिं (ब) अस्माकं<br>(स) शारदा (द) सर्वदा<br>(ii) 'आननम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?<br>(अ) वदनम् (ब) अम्बुजम्<br>(स) अम्भोज: (द) अस्माकम् | 5 |
| 12 | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत। (2+1+2)**<br>राजाबोधिसत्त्व: – महामात्य! नगरस्य समन्तात् धनधान्यसमृद्धा: दानशाला: कारयतु।<br>महामात्य: – यथादिशति महाराज:।<br>राजा – महामात्य! तत्र अर्थिनां कृते अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टवस्तूनि प्रदीयन्ताम्।<br>महामात्य: – यथादिशतिदेव:। राजन्! भवत: दानशीलताम् आकर्ण्य देशान्तरेज्योऽपि जना: आगच्छन्ति।<br>राजा – साधु महामात्य! मम अर्थिन: अभीष्टानि वस्तूनि प्राप्य सन्तुष्टा: भवन्ति। अहं बहुप्रीतोऽस्मि।<br>**I. एकपदेन उत्तरत।**<br>(i) नगरस्य समन्तात् का: स्थापिता:?<br>(ii) राज्ञ: कं गुणम् आकर्ण्य देशान्तरेज्य:जना: आगच्छन्ति?<br>**II. पूर्णवाक्येन उत्तरत।**<br>राजा अर्थिनां कृते कानि वस्तूनि प्रदातुम् आदिशत्?<br>**III. निर्देशानुसारम् शुद्धम् उत्तरं विकल्पेज्य: चित्वा लिखत।**<br>(i) 'भवत: दानशीलताम् आकर्ण्य' अत्र 'भवत:'सर्वनामपदं कस्मै प्रयुक्तम्?<br>(अ) याचकाय (ब) महामात्याय<br>(स) जनाय (द) राज्ञे<br>(ii) 'आगच्छन्ति' क्रियापदस्य कर्तृपदम् किम्?<br>(अ) अमात्या: (ब) जना:<br>(स) अर्थिन: (द) राजा | 5 |

| | | |
|---|---|---|
| 13 | **मञ्जूषासहायतया अधोलिखितश्लोकयोःभावार्थौ पूरयत।**( ½x8)<br>**I.** नास्ति विद्यासमंचक्षुः नास्ति सत्यसमंतपः।<br>नास्ति रागसमंदुखं नास्ति त्यागसमंसुखम्।।<br>**भावार्थः** – अस्मिन् संसारे विद्या एव अस्माकं ___(i)___ अस्ति। ___(ii)___ एव तपः मन्यते। रागः एव ___(iii)___ अस्ति। विषयाणां ___(iv)___ चैव सुखम् अस्ति।<br>**II.** अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।<br>व्ययतो वृद्धिमायाति, क्षयमायाति सञ्चयात्।।<br>**भावार्थः** – हे देवि सरस्वति! तव अयं ___(v)___ अद्भुतः एव। यदा वयम् अस्य ___(vi)___ कुर्मः तदा एषः वर्धते, यदा च वयम् ___(vii)___ कुर्मः तदा तु ___(viii)___ प्राप्नोति।<br>**मञ्जूषा**<br>चक्षुः, त्यागः, सञ्चयं, कोशः, नाशम्, दुःखम्, सत्यं, व्ययं | 4 |
| 14 | **मञ्जूषातः समुचितं पदं चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत।**<br>क्रोधाद्भवति संमोहः सम्मोहात्स्मृतिविभ्रमः।<br>स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥<br>**अन्वय** – क्रोधात् संमोहः ___(i)___ स्मृतिविभ्रमः ___(ii)___ , स्मृतिभ्रंशात् ___(iii)___ बुद्धिनाशात् ___(iv)___ ।<br>**मञ्जूषा**<br>बुद्धिनाशः, भवति, सम्मोहात्, प्रणश्यति | 4 |
| 15 | **वाक्येषु रेखाङ्कितपदानां स्थाने प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत।**<br>(i) <u>जीवितं</u> वाञ्छन् कलहयुक्तं गृहं त्यजेत्।<br>(ii) वानरयूथपतिः <u>नीतिविदाम्</u> अग्रणीः आसीत्।<br>(iii) मेषः <u>महानसं</u> प्रविश्य भोजनं भक्षयति।<br>(iv) कुवाक्यं <u>सौहृदम्</u> नाशयति। | 4 |
| 16 | **अधोलिखितवाक्यानि कथाक्रमेण पुनः लेखनीयानि।** ( ½ x 8)<br>(i) सूपकारैः नित्यं ताडितं मेषं दृष्ट्वा वानरयूथपः वानरान् राजभवनं त्यक्तुम् अकथयत्।<br>(ii) राजा राजवैद्यान् आहूय अश्वरक्षायै न्यवेदत्।<br>(iii) भूपतेः चन्द्रस्य पुत्राः वानरान् भोज्यपदार्थैः पुष्टिं नयन्ति स्म।<br>(iv) ज्वलन् स मेषः अश्वशालां प्रविष्टः परिणामतः दग्धाः अश्वाः प्राणत्राणाय अधावन्।<br>(v) भयत्रस्ताः कपयः गुरुजनोपदेशस्य अवधीरणात् पश्चात्तापं कृतवन्तः।<br>(vi) अन्यस्मिन् अहनि स मेषः सूपकारेण अर्धज्वलितकाष्ठेन ताडितः।<br>(vii) राजगृहे बालवाहनयोग्यः मेषः जिह्वालोलुपतया महानसं प्रविश्य भोजनं खादति स्म।<br>(viii) रसनास्वादलुब्धाः मदोद्धताः मर्कटाः तद् राजभवनं त्यक्तुं न स्वीकृतवन्तः। | 4 |

| | | | |
|---|---|---|---|
| | | | |
| 17 | **रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं चित्वा लिखत –**<br>(i) आमरणात् किं शल्यम् ?<br>(अ) कठिनम् (ब) सरलम्<br>(स) कण्टकम् (द) मरणम्<br>(ii) किं किं उपादेयम् ?<br>(अ) प्रशंसनीयम् (ब) धावनीयम्<br>(स) ग्रहणीयम् (द) मरणम्<br>(iii) सर्वव्यसनविनाशे को दक्षः ?<br>(अ) रुग्णः (ब) प्रवीणः<br>(स) धावकः (द) अमरः<br>(iv) किं च अनर्घम् ? यदवसरे दत्तम्।<br>(अ) मरणम् (ब) कठिनम्<br>(स) बहुमूल्यम् (द) कण्टकम् | 4 |
| | | | |
| | | -o0o0o0o- | |